UNIVERSAL
LIBRARY
OU_184006
UNIVERSAL
LIBRARY

OUP—391 29-4-72—10,000

OSMANIA UNIVERSITY LIBRARY

Call No. S294.1 V41A Accession No. PG S21

Author भगवद्दत्त संपा.

Title अथर्वण ज्योतिषम्

This book should be returned on or before the date last marked below.

THE

# PUNJAB SANSKRIT SERIES

No. VI.

THE

# PUNJAB SANSKRIT SERIES

OR

A COLLECTION OF RARE AND UNPUBLISHED

# SANSKRIT and PRAKRIT WORKS

EDITED BY

THE WELL-KNOWN & EMINENT SCHOLARS

OF

INDIA, EUROPE and AMERICA.

No. 6

LAHORE (INDIA)

THE PUNJAB SANSKRIT BOOK DEPOT

1924.

# आथर्वण–ज्योतिषम्

## आत्म–ज्योतिषम् वा

# ĀTHARVANA JYOTISAM

**OR**

THE VEDĀÑGA JYOTIṢA OF THE
ATHARVA VEDA

**Edited for the first time**

BY

Pandit, Bhagavad Datta B. A.
PROFESSOR OF SANSKRIT AND SUPERINTENDENT
RESEARCH DEPARTMENT D. A. V. COLLEGE LAHORE.

PUBLISHED BY
**MOTI LAL BANARSI DASS**
*Proprietors*
**The Punjab Sanskrit Book Depot, Lahore.**
**1924.**

PUBLISHED BY
**Moti Lal Banarsi Dass**
*Proprietors,*
*The Punjab Sanskrit Book Depot*
*SAID MITHA STREET*
LAHORE,

*(All Rights Reserved by the Publishers)*
**1924.**

PRINTED BY
**Sardari Lal Jain**
*Manager*
*The Bombay Sanskrit Press*
*SAID MITHA STREET*
LAHORE.

# INTRODUCTION.

## I. Manuscript Material.

(1) P. It is contained in the codex numbered 405, according to the catalogue of 1916 of The Bhandarkar Oriental Research Institute. This codex contains the text of the Māṇḍūkī Śikṣā, which was collated by me for the edition of that work as ms. ग. The peculiarities of the codex are the same throughout. The reader may, therefore, look for these on pages 1 and 2 of the introduction of my edition of the Māṇḍūkī Śikṣā.

(2) D. The codex which contains this ms. is 69/1884–86 of The Bhandarkar Oriental Research Institute. Ms. ङ of my edition of the Māṇḍūkī Śikṣā forms a part of this codex. Its peculiarities may also be studied in the introduction above referred to.

There is only one more ms. of Ātharvaṇa Jyotiṣa known to me. It forms a part of the codex No. 400 of the catalogue of 1916 of the B. O. R. Unfortunately the first 24 leaves of this codex, which contain a part of our text "are entirely damaged." Hence its loan for collation work was not asked.

Ms. P. was copied at the end of Nov. 1920, while the variants of D. were noted during the last days of March 1921.

## II. The Text.

The present text based as it is on two mss. only, can not be regarded as a final one. However, in the absence of any new materials forthcoming I thought

it advisable to present to the student of Jyotiṣa literature even this faulty text. The Vedāñga jyotiṣa's of the Rig and the Yajur Vedas are procurable in good editions, and the text of the Ātharvaṇa jyotiṣa is now put before the scholars in print for the first time. It will help them to judge about its value, inspite of the apparent gràmmatical mistakes, which have been left quite unaltered.

## III. The name of the text and its author.

At the end of the work the writer calls this text by the name of "आत्मज्योतिषम्" XIV. 11 I have, however, given it the title of Ātharvaṇa jyotiṣa, as in harmony with the already known Ārca jyotiṣa and the Yājuṣa jyotiṣa's.

Now, as regards the author. If the authority of the text is to be believed, then the author of the Ātma jyotiṣa is Svayambhu Brahma; and the whole subject was related by him to some descendant of Kaśyapa. But this is doubtful, rather impossible. According to Aryan tradition Svayambhu Brahma is a personality of Ādi sṛṣṭi, and at that time the four Vedas did not possess their śākhās. Now the Ātma jyotiṣam ends with the colophon :—

"एवं शौनकशाखायां..............................॥"

which shows that our text is closely related to the Śaunaka śākhā of the Atharva Veda, and not the Atharva Veda proper, Hence it is a compilation of an age much posterior to that of Svayambhu Brahma. It is probable that some one has compiled this small treatise by extracting certain material from the original law-book of Manu, the descendant of Svayambhu

Brahma, and later on adding to it some new and quite recent notions. It is on this account that we find so many śloka's of Manusmṛti in the present text. Cf. XIII. 1–4 with Manu III. 46–49. Chapter XII, and parts of XIII and XIV of Ātma jyotiṣa although not taken from Manu, are still a compilation from some old gṛhya paddhatis* and minor smṛti's.

## IV. The date of the work.

Nothing can be said with certainity about the date of the present work. It appears to be a new work, although I do not deduce this result from the mention in it of the names of the week-days. These names may be as old as Aryan civilization itself, and may not have been extensively used in Vedic or Sanskrit literature on account of the requirements of the *tithi* system in the Yajña affairs. There is on the other hand, the general theme of the work, which attaches to it a lateness in the history of Sanskrit literature, and shows that it has little or no connection with the other Vedāñga jyotiṣa's. Another important fact may be mentioned here. Atharva Veda being a Veda, which deals with medicine and household life especially, required a Vedāñga jyotiṣa to help in the performance of the duties of a good *gṛhastha* = householder. For this purpose there may have been an ancient Ātharvaṇa jyotiṣa, and if it did not exist, or was lost, then some body has tried to fill in this gap

* Months after the above lines were written, I secured a ms. of Reṇu Kārikā on the Pāraskara Gṛhya Sūtra. This Kārikā has been written in the S'aka year 1188. It contains (leaf 2b, s'loka 27b–33a) the same s'loka's with small variants only, as are found in our text XIII. 5–11.

by this Ātma jyotiṣa, compiled according to the notions of his own age, which may be very recent. The text of this Ātma jyotiṣa is not very old may also be inferred from another fact. Ātma jyotiṣa VII. 6 says :—

ज्योतिः शास्त्रप्रयुक्तानां कर्मणां फलदं भवेत् ॥

These jyotiṣa treatises are very recent. Hence the work quoting them, cannot be very old. Again Ātma jyotiṣa IX. 1 states :—

अल्पग्रन्थं महार्थं च प्रवक्ष्यामि भृगोर्मतम् ॥

The context shows that here also the neo-Bhṛguism is referred to and not the old one. All these things put together strengthen the view that the treatise is not a very old one.

## V. The division of time into days, muhūrtas etc, in this and other ancient works.

Ātma jyotiṣa I, 4 and 5 states the division of a muhūrta into its smaller parts. This division is found in other works of Sanskrit literature, and it will be interesting to compare them all here.

The idea of dividing a muhūrta into its smaller parts is not a new one. It is found in a mantra of some lost Śākhā of the Vedas. This mantra has been preserved by the Taittirīya Āraṇyaka. It is as follows :—

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ॥
तैत्तिरीय आरण्यक, प्र० १० । १ । ८ ॥

It is this division which has been later on accepted by a good many authorities on this subject.

(1) Manusmṛti in its present form is certainly

prior to the 15th century B. C.* It has the following verse on this subject :—

निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला ।
त्रिंशत्कलो मुहूर्तः स्यादहोरात्रं तु तावता ॥

Jolly's edition I, 64.

*i. e.* 18 nimeṣā's = 1 kāṣṭhā
30 kāṣṭhā's = 1 kalā
30 kalā's = 1 muhūrta
30 muhūrta's = 1 day and night.

(2) Mahābhārata, if devoid of certain Ākhyāna's and certain other portions such as sahasra-nāma's etc., will belong to a period anterior to the 6th century B. C. It contains the following śloka :—

काष्ठा निमेषा दश पञ्च चैव त्रिंशत्तु काष्ठा गणयेत् कलां ताम् ।
त्रिंशत्कलाश्चापि भवेन्मुहूर्तो भागः कलाया दशमश्च यः स्यात् ॥

Bombay edition, Śānti parva, Adh. 231, 12.

*i. e.* 15 nimeṣā's = 1 kāṣṭhā
30 kāṣṭhā's = 1 kalā
30 kalā's = 1 muhūrta.

(3) Viṣṇu purāṇa which may be placed circa 5th century B. C. copies the Mahābhārata with small changes, thus :—

काष्ठां निमेषा दश पञ्च चैव त्रिंशच्च काष्ठा गणयेत् कलान्ताम् ।
त्रिंशत्कलाश्चैव भवेन्मुहूर्तस्तैस्त्रिंशता रात्र्याहनी समेते ॥*

Krisṇa Sāstri's edition, II, 8, 59.

---

* I totally differ with occidental scholars in assigning the chronological dates to historical events and literary works of Sanskrit literature. They should, therefore, see my other works and articles, which elucidate my views on these points, before criticising me.

*i. e.* 15 nimeṣā's = 1 kāṣṭhā
30 kāṣṭhā's = 1 kalā
30 kalā's = 1 muhūrta
30 muhūrta's = 1 day and night.

(4) Matsya Purāṇa 142, 4 has the same thing in almost the same words.

(5) Kauṭilya's Artha śāstra (atleast 4th century B. C.) gives the following:—

द्वौ त्रुटौ लवः* । द्वौ लवौ निमेषः । पञ्चनिमेषाः काष्ठा । त्रिंशत्काष्ठाः कला । चत्वारिंशत्कला नाडिका । द्वि नाडिका मुहूर्तः ।

Mysore edition p. 107.

*i. e.* 2 truti's = 1 lava
2 lava's = 1 nimeṣa
5 nimeṣā's ? = 1 kāṣṭhā
30 kāṣṭhā's = 1 kalā
40 kalā's = 1 nāḍikā
2 nāḍikā's = 1 muhūrta.

(6) Suśruta proper anterior to 4th century B. C. contains the following passage:—

तत्र लघ्वक्षरोच्चारणमात्रो ऽक्षिनिमेषः । पञ्चदशाक्षिनिमेषाः काष्ठा । त्रिंशत्काष्ठाः कला । विंशतिकलो मुहूर्तः ।

*i. e.* 15 nimeṣā's = 1 kāṣṭhā
30 kāṣṭhā's = 1 kalā
20 kalā's = 1 muhūrta.

(7) Kūrma purāṇa (circa 1st century B. C.) has:—

---

* नलिनीपत्रसंहत्यां सूक्ष्मसूच्या ऽभिभेदने ।
दले दले तु यः कालः स कालो लववाचकः ॥
लवैस्त्रुटिः स्यात् त्रिंशद्भिः

Quoted by Sāyana in his com. on Taittirīya Āraṇyaka X. 1. 8.

काष्ठा पञ्चदश ख्याता ( पंचदशाख्यास्तु ) निमेषा द्विजसत्तमाः ।
काष्ठा त्रिंशत्कला त्रिंशत्कला मौहूर्तिकी गतिः ॥

B. I. edition V. 4.

*i. e.* 15 nimeṣā's = 1 kāṣṭhā
30 kāṣṭhā's = 1 kalā
30 kalā's = 1 muhūrta.

(8) The astronomer Parāśara (circa 1st century B. C.) as quoted by Bhattotapala in his com. of Bṛhat Saṃhitā says:—

यावता कालेन विकृतमक्षरमुच्चार्यते स निमेषः । निमेषद्वयं त्रुटिः । त्रुटिद्वयं लवः । लवद्वयं क्षणः । दश क्षणः काष्ठा । दश-काष्ठा कला । दश कला नाडिका । नाडिकाद्वयं मुहूर्तः ।

Benares edition p. 24.

*i. e.* 2 nimeṣā's = 1 truṭi
2 truṭi's = 1 lava
2 lava's = 1 kṣaṇa
10 kṣaṇa's = 1 kāṣṭhā
10 kāṣṭhā's = 1 kalā
10 kalā's = 1 nāḍikā
2 nāḍikā's = 1 muhūrta

(9) Soma siddhāntā says:—

दशगुर्वक्षरः प्राणः षड्भिः प्राणैर्विनाडिका ।
तत् षष्ट्या नाडिका प्रोक्ता नाडीषष्ट्या दिवानिशम् ॥

Chaukhamba edition p. 1.

*i. e.* 10 guru akṣara's = 1 prāṇa
6 prāṇa's = 1 vināḍikā
60 vināḍikā's = 1 nāḍika
60 nāḍikā's = 1 day & night (30 muhūrta's).

(10) Sūrya siddhānta. I. 11–12 has:—

षड्भिः प्राणैर्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृता ॥११॥
नाडी षष्ट्या तु नात्त्रमहोरात्रप्रकीर्तितम् ।

*i. e.* 6 prāṇa's = vināḍi
60 vināḍi's = 1 nāḍi
60 nāḍi's = 1 day and night.

(11) Vṛddha Vasiṣṭha siddhānta says :—

दशगुर्वक्षरोच्चारकालः प्राणो ऽभिधीयते ।
तत् षट्कैश्च पलं षष्ट्या नाडीषष्ट्या ऽऽर्क्षजं दिनम् ॥१४॥

Benares edition p. 3.

*i. e.* 10 guru akṣara's = 1 prāṇa
6 prāṇa's = 1 pala
60 pala's = 1 nāḍi
60 nāḍi's = 1 day (and night.)

(12) Brahma siddhānta says :—

अष्टादश निमेषास्तु काष्ठा त्रिंशत् तु ताः कला ॥१२॥
तासां त्रिंशत् क्षणस्ते ऽपि षट् नाडीति प्रशस्यते ।
यद्वा गुर्वक्षराणां तु दशकं प्राण उच्यते ॥१३॥
षड्भिः प्राणैर्विनाडी तु तत् षष्ट्या घटिका तथा ।
श्वासः प्राणास्तु सर्वेषां तदायुस्तेन निर्दिशेत् ॥१४॥
नाडीषष्ट्या ह्यहोरात्रं ( दिवारात्रं ) मासस्तात्त्रिंशता भवेत् ।

Ib. p. 2.

*i. e.* 18 nimeṣā's = 1 kāṣṭhā
30 kāṣṭhā's = kalā
30 kalā's = 1 kṣaṇa
6 kṣaṇa's = 1 nāḍi

or

10 guru akṣara's = 1 prāṇa
6 prāṇa's = 1 vināḍi

60 vināḍi's = 1 ghaṭikā
and
60 nāḍi's = 1 day and night (30 muhūrtas).

(13) Ahirbudhnya saṃhita says :—

अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ।
तास्तु त्रिंशत् क्षणस्ते तु मुहूर्तो द्वादश स्मृतः ॥७॥

IV. 7.

(14) The lexicon of Amara repeats the above thus :—

अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ।
तास्तु त्रिंशत्क्षणः ते तु मुहूर्तो द्वादशास्त्रियाम् ॥११॥

IV. 11.

Also quoted by Sāyaṇa in Taittiriya Āraṇyaka X. 1. 8.

*i. e.* 18 nimeṣā's = 1 kāṣṭhā
30 kaṣṭha's = 1 kalā
30 kalā's = 1 kṣaṇa
12 kṣaṇa's = 1 muhūrta.

Nirṇaya sāgar, edition 1915.

(15) And in the end* according to I. 4, 5 of this Ātma jyotiṣa the division of time is the following:—

*i. e.* 12 akṣi nimeṣa's = 1 lava
30 lava's = kalā
30 kalā's = 1 truṭi
30 truṭi's = 1 muhūrta.

Now in the foregoing tables, roughly speaking, there are three types of the division of a muhūrta etc.

(*a*) The method adopted by the Dharmaśāstras, Mahābhārata, Purāṇas and the lexicon of Amara.

* Besides these tables, some more may be fouud in H. H. Wilson's translation of the Viṣṇu Purāṇa pp. 22, 23.

(*b*) The method of the jyotiṣa works.

(*c*) The method of Kauṭilya.

These three may agree in some points, but generally they indicate

(1) either a different school

(2) or provincialism

(3) or a chronological difference of time, when new methods might have been introduced.

Nothing can be said with definitness on these points. Concerned only with the Ātma jyotiṣa for the time being, as we are, we can say, that although mainly agreeing with type (*a*), it still shows a small difference, nowhere else to be found.

How arose this difference is a question for the astronomer to settle. We can only say that the present text is related more to the Dharmaśāstras, than to jyotiṣa proper.

I am greatly thankful to Mahāmahopādhyāya Pt. Śiva Datta ji who very kindly went through the text, after it has been printed, proposed emendations, and helped me in making the corrigenda. His emendations are printed after the contents list.

Research Dept.,
D. A.V. COLLEGE, LAHORE.
*January, 1924.*

BHAGAVAD DATTA.

# विषय-सूची।

## मुहूर्तप्रकरणम् [१]


(१) मुहूर्तनामानि ... प्र० १
(२) मुहूर्तेषु कर्तव्यानि कर्माणि ... प्र० २
(३) ,, ,, ,, ... प्र० ३


## करणप्रकरणम् [२]


(४) करणनामानि, तेषु कर्तव्यानि कर्माणि च ... प्र० ४
(५) करणविचारपूर्वकं कृतकर्मणां फलम् ... प्र० ५


## तिथिप्रकरणम् [३]


(६) तिथिनामानि ... प्र० ६
(७) तिथिषु कर्तव्यानि कर्माणि ... प्र० ७


## वारप्रकरणम् [४]


(८) वारनामानि, वारेषु प्रशस्तकर्माणि ... प्र० ८


## नक्षत्रप्रकरणम् [५]


(९) नक्षत्रनामानि, तेषां प्रभावे भृगोर्मतम् ... प्र० ९
(१०) नक्षत्रविचारानुसारेण प्रशस्तकर्माणि ... प्र० १०
(११) ,, ,, ... प्र० ११


## गर्भाधानप्रकरणम् [६]


(१२) पुष्पवती किं किं कुर्यात् ... प्र० १२
(१३) गर्भाधाने तिथिविचारः ... प्र० १३
(१४) नक्षत्रयोगेषु कृतकर्मणां फलम् ... प्र० १४

Emendations proposed by
Mahāmahopādhyāya Śiva Datta ji
in the body of the text.

| Page. | Line | Printed text | Emen. proposed. |
|---|---|---|---|
| 3 | 4 | अर्थसञ्चयमानानाम॰ | अर्थसञ्चयकामानाम॰ |
| 4 | 13 | कौस्तुभं | किंस्तुघ्नं |
| 5 | 4 | ,, | ,, |
| 9 | 20 | भर्तृस्थिता | भर्तृस्थितौ |
| 11 | 11 | ॰द्विपद्देभ्यः | ॰द्विपत्द्वेभ्यः |
| 11 | 11 | प्रत्वरः | प्रत्यरिः |
| 11 | 18 | प्रत्वरं | प्रत्यरिं |

## CORRIGENDA.

| | | | |
|---|---|---|---|
| 5 | 20 | प्रयोज्यं | प्रयोज्यं[2] |
| 11 | 13 | दश्मं | दशमं |
| 13 | 17 | ॰न वकास्त्रयः | नवकास्त्रयः |
| 14 | 6 | शुभम् | शुभाम् |

॥ ओम ॥

# [आथर्वण-ज्योतिषम्]

## [मुहूर्त्तप्रकरणम्]

[१]

अथ ब्रह्माणं स्वयम्भुं गुरुं लोकपितामहम् ।
ब्रह्मलोके सुखासीनं काश्यपः परिपृच्छति ॥१॥
किं प्रमाणं मुहूर्त्तानां रात्रौ वा यदि वा दिवा ।
चन्द्रादित्यगतं सर्वं तन्मे प्रब्रूहि पृच्छतः ॥२॥
तस्य शुश्रूषमाणस्य काश्यपस्य महात्मनः ।
प्रोवाच भगवान् सर्वं मुहूर्त्तं ज्ञानमुत्तमम् ॥३॥
द्वादशाक्षिनिमेषस्तु लवो नाम विधीयते ।
लवाः त्रिंशत्कला ज्ञेया कलात्रिंशत्त्रुटिर्भवेत् ॥४॥
त्रुटीनां तु भवेत्त्रिंशन्मुहूर्त्तस्य प्रयोजनम् ।
द्वादशाङ्गुलमुच्छ्रेङ्कुं[1] तस्य छाया प्रमाणतः ॥५॥
नवती षडाङ्गुलाश्चैव प्रतीचीं तां प्रकाशयेत् ।
पुरस्तात्सन्धिवेलायां मुहूर्त्तो रौद्र उच्यते ॥६॥
श्वेतः षष्टिः समाख्यातो मैत्रो वै द्वादशाङ्गुलः ।
षट्सु सारभटो ज्ञेयः सावित्रः पञ्चसु स्मृतः ॥७॥
चतुर्षु तु[2] वैराजस्त्रिषु विश्वावसुस्तथा ।
मध्याह्ने अभिजिन्नाम यस्मिन् छाया प्रतिष्ठिता ॥८॥

---

1 D ०मुच्छ्रेषं । 2 P चतुर्पूश्चनु (?) ।

प्राचीं वै गामिनीं छायां रौहिणस्त्रिषु वर्त्तते ।
बलश्चतुर्षु विख्यातो विजयः पञ्चसु स्मृतः ॥९॥
नैर्ऋतस्तु षडङ्गुल्या वारुणो द्वादशाङ्गुलः ।
सौम्यः षष्टिः समाख्यातो भगस्तु परमस्तथा ॥१०॥
एते मुहूर्त्ता व्याख्याता दश द्वौ च तथा त्रयः ।
अहन्येव तु विज्ञेया रात्रावपि न संशयः ॥११॥
अत ऊर्ध्वं तु सर्वेषामानुपूर्व्या शुभाशुभम्[3] ।
सर्वं विस्तरशस्तावत्तन्मे निगदतः शृणु ॥१२॥ ॥१॥

[ २ ]

रौद्रे रौद्राणि कुर्वीत रुद्रकार्याणि नित्यशः ।
यच्च रौद्रं भवेत्किञ्चित् सर्वमेतेन कारयेत् ॥१॥
श्वेते वासश्च स्नानं च ग्रामोद्यानं तथा कृषिः ।
आरम्भाश्चात्र सिध्यन्ति ये चार्थाश्चिन्तिताः क्वचित् ॥२॥
मैत्रे मैत्राणि कुर्वीत मित्रकार्याणि नित्यशः ।
यच्च मैत्रं भवेत्किञ्चित् सर्वमेतेन कारयेत् ॥३॥
अभिचारं तु शत्रूणां कुर्यात्सारभटेन तु ।
आत्मार्थे सुहृदर्थे[1] वा नश्यन्ते तस्य शत्रवः ॥४॥
सावित्रेण मुहूर्त्तेन देवकार्याणि कारयेत् ।
यज्ञान् विवाहानड्वाहंश्चूडोपनयनानि च ॥५॥
वैराजेन मुहूर्त्तेन राजपौरुषमारभेत्[2] ।
मर्माणि परदानानि शस्त्रकर्म च कारयेत् ॥६॥
विश्वावसौ[3] तु सर्वार्थानारम्भांश्चात्र कारयेत् ।
सर्वेषां च द्विजातीनां स्वाध्यायस्तु प्रशस्यते ॥७॥

---

3 P D शुभा० ।

1 P सुहृदेथं । 2 D राजपुरुषमारभेन । 3 P विश्वावसन्त ।

ब्रह्मक्षत्रियवैश्यानां शूद्राणां चापि नित्यशः ।
सर्वेषामेव वर्णानां योगो मध्यन्दिनेऽभिजित् ॥८॥
अभिजित् सर्वकामाय सर्वकार्यार्थसाधनैः ।
अर्थसश्वयमानानामध्वानं गन्तुमिच्छताम् ॥९॥
रौहिणे वापिता वृक्षा बिल्वगुल्मलतास्तथा ।
अरोगाः पुष्पवन्तश्च फलवन्तश्च नित्यशः ॥१०॥
बलेन तु बलं राजा स्वयमारुह्य योजयेत् ।
योगः सम्पत्तिकं कार्यं शत्रंश्च विषमे जयेत् ॥११॥२॥

[ ३ ]

विजयेन प्रयातस्य विजयो नात्र संशयः ।
मङ्गलान्यत्र कुर्वीत शान्तिः स्वस्त्ययनानि च ॥१॥
नैर्ऋते द्योतयेत्सेनां परराष्ट्रं तु मर्दयेत् ।
कर्त्तः सम्पत्करो ह्येष सर्वशत्रुनिबर्हणः ॥२॥
वारुणेन मुहूर्त्तेन वारुणानि प्रवापयेत्[2] ।
गोधूमान् यवशालींश्च इक्षवश्चोत्पलानि[3] च ॥३॥
सौम्ये सौम्यानि कुर्वीत सोमकार्याणि नित्यशः ।
यच्च सौम्यं भवेत्किञ्चित् सर्वमेतेन कारयेत् ॥१४॥
सर्वासामेव नारीणां कन्यानां च विशेषतः ।
सौभाग्यानि प्रयुञ्जीत भगे भीमपराक्रमे ॥५॥
भगेन वरयेत् कन्यां ब्राह्मणीं कुलवर्द्धनीम् ।
भगेन वरिता कन्या नैव सान्यत्र गच्छति ॥६॥३॥

---

4 P सर्वकार्यार्थ साधनः ।

1 P मंगलां तत्र । 2 D There is a blackdot on long 'आ' showing as if it is cancelled. 3 P ०लीश्चेत्तव० । D ईत्त० ।

# [ करणप्रकरणम् ]

[ ४ ]

शुक्लप्रतिपदिरात्रौ[1] दिवि पञ्चम्यां तथाष्टमीं रात्रौ ।
द्वादश्यामपि च दिवा प्रथमं प्रतिपद्यते करणम् ॥१॥
पौर्णमास्यां बवं रात्रौ तच्चतुर्थ्यां पुनर्दिवा ।
तद्धि तत्सप्तमीरात्रौ तच्चैवैकादशी दिवा ॥२॥
शुभाशुभनिबद्धानि करणानि निबोधत ।
तानि तत्वेन विज्ञाय नापदं प्राप्नुयान्नरः ॥३॥
एकादशाभिः करणैर्मासः सम्प्रतिपद्यते ।
ध्रुवाणि तत्र चत्वारि चलान्यन्यानि[2] सप्त च ॥४॥
बवं च बालवं चैव कौलवं तैतिलेति च ।
गराजि[3] वणिजं चैव विष्टिर्भवति सप्तमम् ॥५॥
शकुनिं चतुष्पदं नागं चतुर्थं कौस्तुभं भवेत् ।
एकैकस्य तु यत्कर्म तद्वक्ष्यामि पृथक् पृथक् ॥६॥
आद्यं तु शकुनिं नाम रात्रौ कृष्णचतुर्दशी ।
आधाने हरणे चैव तथैव च पलायने ॥७॥
भृत्यानामथ योधानां पत्निणां गृहपोषणे ।
चिकित्सायां तु युद्धे च सर्वत्रैतत्प्रशस्यते ॥८॥
भूततन्त्रं बलिं दद्याच्छत्रूणां परघातकम् ।
करणं चतुष्पदं नाम कृष्णपञ्चदशी दिवा ॥९॥
चतुष्पदानां सर्वेषां हितं सर्वेषु कर्मसु ।
श्राद्धमत्र च कुर्वीत प्रयतश्च भवेन्नरः ॥१०॥
सोदकानि च कार्याणि सर्वाण्येतानि[4] कारयेत् ।
कृष्णपञ्चदशी रात्रौ नागं करणमुच्यते ॥११॥

---

1 D ०प्रतिपदरात्रौ । 2 P चेलान्यन्यानि । 3 P गराणि । 4 सर्वाण्येवात्र ।

नष्टं नष्टं तथा बद्धं तदन्तमिति निर्दिशेत् ।
यानि प्रसह्य कार्याणि प्रमथ्यहरणानि[5] च ॥१२॥
तानि नागे प्रयुक्तानि सिद्ध्यन्ति फलयन्ति च ॥ १३ ॥४॥

[ ५ ]

शुक्लप्रतिपदि दिवा कौंस्तुभं करणं भवेत् ।
वैश्वदेवमिति ख्यातं प्रशस्तं सर्वकर्मसु ॥१॥
बवेन ध्रुवकर्माणि क्षिप्राण्यपि च कारयेत् ।
प्रस्थाने च प्रवेशे च तद्धि सर्वार्थसाधकम् ॥२॥
बालवं ब्राह्मणानां तु सर्वारम्भेषु शोभनम् ।
चूडोपनयने यज्ञे विवाहे भूतिकर्मसु ॥३॥
त्रयाणामत्र वर्णानामनारम्भो विधीयते ।
अन्यत्र शोभने राज्ञे शान्तिकं पौष्टिकं प्रति ॥४॥
मैत्रयुक्तं तु यत्कर्म यच्च स्यात्सिद्धिकारकम् ।
स्थावराणि च कार्याणि कौलवे तानि कारयेत् ॥५॥
राजद्वारिकमारम्भं कारयेत्तैतिले दिने ।
एतद्धि[1] करणं श्रेष्ठं नित्यं राज्ञोपसेविनाम् ॥६॥
अलङ्कारांश्च विविधान् दिव्यान्याभरणानि च ।
अन्यच्चापि तथा युक्तं युक्तानां तु प्रतिक्रियाः ॥७॥
गराजिना तु कुर्वीत यत्कर्म्म गृहमेधिनाम् ।
पशूनां पोषणं चैव प्रयोज्यं क्रयविक्रयम् ॥८॥
गृहप्रवेशं वास्तूनां गृहाणां गोपणानि च ।[2]
विशेषेण तु कार्याणि कर्षणादीनि कारयेत् ॥९॥

5 P प्रमथ्यहरणानि । 1 P एतद्धि० ।
2 P D प्रायंग्यं । In D this reading is dotted (i. e. cancelled) and प्रयोज्यं is written instead on the margin.

वणिजं वणिजानां तु सर्वपण्येषु शोभनम् ।
विक्रेता रिध्यते तत्र क्रेता तत्र न रिध्यति[3] ॥१०॥
विष्टिना करणे कर्म न कुर्यान्नैव कारयेत् ।
कृच्छ्रेणापि[4] कृतं कर्म भवेदल्पफलोदयम् ॥११॥
यदि सिद्ध्यति तत्कर्म विष्टिना तु कदाचन ।
न तच्चिरमशंकेनं[5] शक्यं भोक्तुं सुरैरपि ॥१२॥
आगतं धननाशाय आदौ कार्यविनाशनी ।
मध्ये प्राणहरा ज्ञेया विष्टि पुच्छे ध्रुवं जयः॥१३॥
आगन्तु घटिकाः पञ्च वर्त्तमाने चतुर्द्दश ।
मध्ये चाष्टौ विजानीयाद्विष्टिपुच्छे त्रयः स्मृताः ॥१४॥
शकुनस्य गरुत्मान् वृषभो वै[6][7] चतुष्पदे ।
नागस्य देवता नागाः कौस्तुभस्य धनाधिपः ॥१५॥
बवस्य देवता विष्णुर्बालवस्य प्रजापतिः ।
कौलवस्य भवेत्सोमस्तैतिलस्य शतक्रतुः ॥१६॥
गराजिर्वसुदेवत्यो मणिभद्रो[8] ऽथ वाणिजे ।
विष्टेस्तु दैवतं मृत्युर्देवताः परिकीर्त्तिताः ॥१७॥
कृत्तिरासादिवादरभूत[9] दिवा शुचिरष्टादिवाकरपूर्णादिवा[10] । ?
इति विष्टिरहर्ग्रहण रात्रिचरान च कर्म्म भवेत्कृतमाशुशुभम्[11]॥१८॥५॥

## [ तिथिप्रकरणम् ]

[ ६ ]

आदौ वर्जयेद्धीरः प्रस्थाने प्रथमां तिथिम् ।
द्वितीया सम्प्रयातस्य सिद्धिमर्थं विनिर्दिशेत् ॥१॥

---

3 D निरुध्यति । 4 P कृच्छ्रेणापि । 5 P ०शंकेतं । 6 P ०हरान्ते स॥ । 7 P चैव । 8 D माणिभद्रो । 9 P कृत्रि० । 10 P शुचिरष्टदि० । D शुचिरष्टादिवैकर० । 11 P कृतमाशुभम ।

तृतीया क्षेममारोग्यं चतुर्थी मरणाद्भयम् ।
पञ्चमी विजया श्रेष्ठा सा वै सर्वार्थसाधकी ॥२॥
षष्ठी तनयलाभाय[1] सप्तमी त्वन्नभाग्भवेत्[2] ।
अष्टमी रोगलाभाय नवम्यां न निवर्त्तते ॥३॥
दशम्यां प्रस्थितो राजा भूमिलाभाय कल्पते ।
एकादशी तु सर्वत्र प्रशस्ता सर्वकर्मसु ॥४॥
द्वादशी त्वर्थनाशाय ... कुर्यात्त्रयोदशी ? ।
चतुर्द्दशी चलत्कर्म्म कौतुकान्यत्र कारयेत् ॥५॥
अमावास्यां न यात्रा स्यात् पौर्णमास्यां तथा दिवा ।
पौर्णमास्यां प्रयातस्य न सिद्धिस्तस्य जायते ॥६॥
षडष्टौ नव चत्वारि पक्षाच्छिद्राणि वर्जयेत् ।
अपि नक्षत्रसम्पन्नां वर्जयेत्तु चतुर्द्दशीम् ॥७॥
नन्दा भद्रा जया रिक्ता पूर्णा पक्षस्तु पञ्चमी ।
तिथयः पञ्च विज्ञेयाः पक्षयोरुभयोरपि ॥८॥
नन्दां प्रतिपदं विद्यात् षष्ठीमेकादशीमपि ।
द्वितीया सप्तमी भद्रा द्वादशी चोपपद्यते ॥९॥
तृतीया चाष्टमी चैव जया च स्यात्त्रयोदशी ।
चतुर्थी नवमी रिक्ता तथैव च चतुर्द्दशी ॥१०॥
पञ्चमी दशमी पूर्णा तथा पञ्चदशीति च ।
तिथयो ह्येषु[3] वारेषु सिद्धार्थास्तत्र तच्छृणु ॥११॥
नन्दां भृगौ सोमसुते च भद्रां भौमे जयां सूर्यसुते च रिक्ताम् ।
पूर्णां गुरौ पञ्चसु पञ्च एते जयावहाः सर्वफलप्रदाश्च ॥१२॥

---

1 P त्वन्नलाभाय । D has धनलाभाय, but धन is cancelled and तनय is written on the margin. 2 D has धनला० this is cancelled and त्वन्न is written on the margin. 3 P ग्ऐषु ।

सर्वं[1] युग्मं छिद्रमाहुस्तिथिज्ञाः सामावास्यां न द्वितीयादशम्यौ ।
ओजः श्रेष्ठ तत्राग्रं[4] तृतीयाः सर्वारम्भा वर्जनीया नवम्याम्॥१३॥६॥

[ ७ ]

नन्दायां भक्ष्यभोज्यानि भूषणानि वरस्त्रियः ।
आनन्दं चैव कुर्वीत मनः प्रियतमानि च ॥१॥
भद्रायां भद्रबाह्यानि[1] यानि योगासनानि[2] च ।
स्वस्तिवाचनकर्माणि कारयेदारभेति? च ॥२॥
जयायां योजयेत् सेनां वणिजः क्षिप्रकारिणः ।
पण्यविक्रयणं कुर्युः शस्त्रकर्म च कारयेत् ॥३॥
रिक्तायां वर्जयेन्नित्यं तिथौ तिथिविचक्षणः ।
ध्रुवाणि सर्वकार्याणि स्थावराणि चलानि च ॥४॥
पूर्णायां सेतुबन्धांश्च कोष्ठान् कोशांश्च कारयेत् ।
वाहनानि च पोषे तु रथयानानि कारयेत् ॥५॥
एवमेव त्रिरभ्यस्तं पक्षेणं[4] परिवर्जयेत् ।
ज्योतिःशास्त्रप्रयुक्तानां कर्मणां फलदं भवेत् ॥६॥
ऋतुक्षये चन्द्रमसः क्षये च पक्षक्षये ज्योतिषि सङ्ग्रहे च ।
नक्षत्रवर्गेषु विगर्हितेषु यात्राविधानं न वदन्ति तज्ज्ञाः ॥७॥
पक्षक्षयस्तु यः प्रोक्तः कियन्तं कालमादिशेत् ।
एकादश्यां व्यतीतायां विज्ञेयः पक्षसंक्षयः[5] ॥८॥
शुक्रो धनक्षयं कुर्याद् बुद्धिमोहं बृहस्पतिः ।
"लोहितांगो महाव्याधिं कुरुते[6] नात्र संशयः ॥९[7]॥

---

4 P तत्रजार्य । D तत्राग्रं, but not clear.

1 D ०बाह्यानि । 2 D योग्यासनानि । 3 P पूर्वायां । 4 P पक्षिणः ।
5 P ०संशयः। 6 D om. 7 Both mss. give number 9 on the next line, and go on counting wrongly till śloka 21.

बुधो बन्धुपरिक्लेशं विप्रवासं शनैश्चरः ।
बन्धुपक्षक्षयं सूर्यो भयं सोमस्तथैव च ॥१०॥
आत्मरक्षा तु नक्षत्रं तिथि स्यादर्थसाधकी ।
करणे कार्यनिष्पत्तिर्मुहूर्त्ते लाभमादिशेत् ॥११॥
चतुर्भिः कारयेत्कर्म सिद्धिहेतोर्विचक्षणः ।
तिथि-नक्षत्र-करण-मुहूर्त्तेनेति नित्यशः ॥१२॥
तिथेरपि च दूरत्वात्त्रिभिः कर्म समारभेत् ।
नक्षत्रेण करणेन मुहूर्त्तेनेति[7] नित्यशः ॥१३॥
नक्षत्रस्य हि दूरत्वाद् द्वाभ्यां कर्म समारभेत् ।
करणेन मुहूर्त्तेन त्वरमाणस्तु बुद्धिमान् ॥१४॥
करणस्य हि दूरत्वान् मुहूर्त्तेनैव कारयेत् ।
मुहूर्त्तेन कृतं कर्म सिध्यते नात्र संशयः ॥१५॥
दूरस्थस्य मुहूर्त्तस्य क्रिया च त्वरिता यदि ।
द्विजपुण्याहघोषेण कृतं स्यात्सर्वसांपदम्[8] ॥१६॥
नक्षत्रस्य मुहूर्त्तस्य तिथेश्च करणस्य च ।
चतुर्विधस्य ज्ञानस्य शकुनो दण्डनायकः ॥१७॥
शकुनः पवनश्चैव मनः परिजनस्तथा ।
यस्यैतान्यनुकूलानि सिद्धिरेव न संशयः ॥१८॥
न तत्र बलवती तारा यत्रेन्दुर्बलवत्तरः ।
न हि भर्तृस्थिता[9] नारी क्वचित्स्वातन्त्र्यमर्हति ॥ १९ ॥
न कृष्णपक्षे शशिनः[10] प्रभावस्ताराबलं तत्र विचार्य देयम् ।
विदेशयाते[11] विकले च पत्यौ सर्वाणि कार्याणि करोति पत्नी ॥२०॥

---

7 P D मुहूर्तेन नेति । 8 P सर्वस्यांपदं । 9 P भर्तु स्थिता ।
10 P शिन । 11 P विदेश गते ।

तिथिरेकगुणः[12] प्रोक्तो[13] नक्षत्रं च चतुर्गुणम् ।
वारस्याष्टगुणः प्रोक्तः करणं षोडशान्वितम् ॥ २१ ॥
द्वात्रिंशद्गुणो योगस्ताराषष्टिसमन्वितः ।
चन्द्रः शतगुणः प्रोक्तस्तस्माच्चन्द्रं बलाबलम् ॥ २२ ॥
समीक्ष्य चन्द्रस्य बलाबलानि ग्रहाः प्रयच्छन्ति शुभाशुभानि ।
मनःसमेतानि यथेन्द्रियाणि कर्माण्येतां[14] यान्ति न केवलानि॥२३॥७॥

## [ वारप्रकरणम् ]

[ ८ ]

आदित्यः सोमो भौमश्च तथा बुधबृहस्पती ।
भार्गवः शनैश्चरश्चैवैते[1] सप्तदिनाधिपाः ॥ १ ॥
नृपाभिषेकं नृपतिप्रयाणं नृपस्य कार्यं नृपदर्शनं च ।
यच्चाग्निकार्यं भुवि किञ्चिदुक्तं तत्सर्वमादित्यदिने प्रशस्तम् ॥२॥
पानं रसानां मधुसोमपानं सौभाग्यकर्माण्यनुलेपनानि ।
क्षेत्रे च बीजानि वपेत् वृक्षान् सोमस्य कुर्याद्दिवसे[2] विधिज्ञः ॥३॥
भेदाभिघातो नगरे पुरे वा सेनापतित्वं च तथैव राज्ये ।
व्यायामशस्त्राभ्यसनं च चौर्यं भूमेःसुतस्या ह्नि सदा प्रशस्तम्॥४॥
दूतप्रवेशो रणकारणार्थं कन्याप्रजार्थं रिपुसन्धिकार्यम् ।
भिन्ने च[3] मन्त्रे[4] प्रतिसन्धनीयं क्षिप्रं प्रशंसन्ति दिने बुधस्य[5] ॥५॥
स्वाध्यायदेवार्चनवेश्मकार्यं संस्कारदीक्षाश्च तथा यतीनाम् ।
वस्त्राणि दारा प्रियभूषणानि कृषिं कुर्याद्देवगुरोर्दिने च॥६॥
अश्वप्रवाहं[6] प्रथमं प्रशस्तं योगप्ररोहो गजरोहणं च ।
कन्याप्रदानं क्रयविक्रयौ च तेषां सदा शुक्रदिने प्रशस्तम् ॥७॥

---

12 P ० गुणाः। D गुणा। 13 P D प्रोक्ता। 14 D कर्मगयेतां।
1 P ०चैव पते। 2 P ०द्दिवे। 3 D श। 4 P मंत्रगा। 5 D adds तु in the end. 6 P अय०।

स्थाप्यं च कर्म्मक्रतुभिश्च यूपो गृहप्रवेशो गजबन्धनं च ।
ग्रामेऽथ वासो नगरे पुरे वा शनैश्चरे सर्वमिदं प्रशस्तम् ॥८॥ ८॥

## [ नक्षत्रप्रकरणम् ]

[ ६ ]

आत्मकर्म गुणं श्रेष्ठं पुरुषं पुरुषं प्रति ।
अल्पग्रन्थं महार्थं च प्रवक्ष्यामि भृगोर्मतम् ॥१॥
पृथक् पुरुषविज्ञेयं नक्षत्राणां शुभाशुभम् ।
आत्मसम्पत्करं ज्ञेयमात्मन ऋद्धिमिच्छताम् ॥२॥
नवानां त्रिवर्गाणामाधाने जन्मकर्म्मणि ।
अधमोत्तमवर्गेषु सम्वदतीह भागशः ॥३॥
जन्मसम्पद्विपत्क्षेम्यः प्रत्वरः साधकस्तथा ।
नैधनो मित्रवर्गश्च परमो मैत्र एव तु ॥४॥
दशमं जन्मनक्षत्रात् कर्म्मनक्षत्रमुच्यते ।
एकोनविंशतिं चैव गर्भाधानकमुच्यते ॥५॥
द्वितीयमेकादशं विंशमेव सम्पत्करो गणः ।
तृतीयमर्कविंशं तु द्वादशं तु विपत्करम् ॥६॥
क्षेम्यं चतुर्थं द्वाविंशं भवेद्यच्च त्रयोदशम् ।
प्रत्वरं पञ्चमं विद्यात्त्रयोविंशं चतुर्दशम् ॥७॥
साधकं तु चतुर्विंशं षष्ठं पञ्चदशं तु यत् ।
नैधनं पञ्चविंशं तु षोडशं सप्तमं तथा ॥८॥
मैत्रे सप्तदशं विद्यात् षड्विंशामिति चाष्टमम् ।
सप्तविंशं परं मैत्रं नवमष्टादशं च यत् ॥९॥
नवनक्षत्रके वर्गे प्रथमं तृतीयं तु वर्जयेत् ।
पञ्चमं सप्तमं चैव शेषैः कार्याणि कारयेत् ॥१०॥

---

1 P नैधधं । 2 P नवममष्टादशं तु ।

आधाने जन्मकर्म्मणि[3] ज्ञेयास्त्वेतानुपूर्वशः ।
त्रिनक्षत्रा नवगणास्तेषां कर्मफलं शृणु ॥११॥९॥

[ १० ]

आधाने जन्मनक्षत्रे नैधने प्रत्वरेषु च ।
प्रवासे प्राणसन्देहे क्षुरकर्मविवर्जयेत् ॥१॥
पराजयं प्रवासं च विवादं गृहकर्म च[1] ।
वर्जयेन्मङ्गलं कार्यं शान्तिः स्वस्त्ययनानि च ॥२॥
चौरं विवाहं भैषज्यं यात्रां सेनां च योजयेत् ।
सर्वमङ्गलकार्येषु त्रिषु कर्म्म[2] च[3] वर्जयेत् ॥३॥
विद्यारम्भं तपो दानं मार्जनं भेषजं क्रिया ।
भरणं च सुभृत्यानां कुर्यात् सम्पत्करे गणे ॥४॥
अनृतमधर्मसंयुक्तं शत्रूणां चाभिचारकम् ।
विपत्करे गणे कुर्यात् प्रहरेताददाति[4] च ॥५॥
क्षेम्येऽध्वानं[5] प्रपद्येत गोप्यार्थाश्चात्र[6] गोपयेत् ।
वाहनानि च पोषे च बहुशोऽर्थांश्च योजयेत् ॥६॥
प्रत्वरे तु न[7] कर्त्तव्याः सर्वारम्भाः कदाचन ।
दुर्गं च न प्रवेष्टव्यं न च किञ्चित्समारभेत् ॥७॥
असाध्यान्यपि कार्याणि साधयेत्साधके गणे ।
सर्वार्थास्तस्य सिध्यन्ति न वानर्थान्समश्नुते[8] ॥८॥
नैधने तु न गन्तव्यं येषु जाताश्च शत्रवः ।
तेभ्यो रक्षेत चात्मानमत्यन्तं च न विश्वसेत् ॥ ९ ॥
मैत्रे विवाहानड्वाहंश्चूडोपनयनानि च ।
कुर्यात्परममैत्रे तु यतस्तंभनमात्मकम् ॥ १० ॥

---

3 P·D कर्म्मगणा । 4 P ज्ञेयास्त्व० ।

1 D च वर्जयेत् । 2 P गृहकर्मसु च । 3 P D कर्म्मसु। D cancells सु and gives च instead. 4 P ०ददीति । 5 P ०ध्वान । 6 P ०र्थश्चात्र । 7 P om. 8 D चानर्थान समः० ।

परं परममैत्रे तु नरो ह्यभिलषेत्फलम् ।
प्राप्नुयादर्थसिद्धिं च क्षिप्रमेव न संशयः ॥ ११ ॥ १० ॥

[ ११ ]

ग्रहोल्का शनिनिर्घातैः कम्पदाहैस्तु पीड्यते ।
यद्यद्भयं भवत्यत्र तत्प्रवक्ष्याम्यशेषतः ॥ १ ॥
आधाने विद्रवन्त्यर्था व्याधयो जन्मनि ध्रुवम् ।
न च सिध्यन्ति कार्याणि कदाचिद्दशमे हते ॥ २ ॥
संपत्करे हते हानिर्वृद्धिश्चैव विपत्करे ।
क्षेम्ये हते न प्रवसेत् साधकेऽर्थान्न साधयेत् ॥ ३ ॥
प्रत्वरे तु हते विद्यान् महारोगप्रनाशनम् ।
नैधने तु हते विद्यान् महानरिवधो भवेत् ॥ ४ ॥
मित्रवर्गाश्च मैत्रे तु न भवन्ति यथा पुरा ।
हते परममैत्रे तु मनो नित्यं न तुष्यति ॥ ५ ॥
यद्यत्पीड्यते नक्षत्रं यस्मिन्यस्मिन् यदा गणे ।
तत्तत्कर्म्म न कुर्वीत पुरस्ताद्यत्र चोदितम् ॥ ६ ॥
वर्गान्तं यत्तु नक्षत्रं वर्गाद्यं यत्पुनर्भवेत् ।
आनुपूर्व्येण वर्गाणामेवं तेन चक्रास्त्रयः ॥ ७ ॥ ११ ॥

[ १२ ]

ब्राह्मणी त्रयोदशाहं स्नाता पुष्पमधारयत् ।
क्षत्रिणी द्वादशाहं तु वैश्या त्वेकादशस्तथा ॥ १ ॥
शूद्रीणामथ सर्वासां दशरात्रौ विधीयते ।
वर्णक्रमेण नारीणामेष पुष्पविधिः स्मृतः ॥ २ ॥

---

1 P भवन्तीन्न । D भवति । 2 P ०चिद्दशमे । 3 P महाव्लग० ।
4 P यं तु । 5 P चक्रा० ।

1 P त्येका० । 2 D पुष्प० ।

भूमौ स्तीर्णेषु दर्भेषु नियता ब्रह्मचारिणी ।
स्वपेत पुष्पमासाद्य त्र्यहं भुंक्ते नालङ्कृता ॥ ३ ॥
हस्तयोर्भूतले वापि पर्णे वाप्यशनं मितम् ।
नारी पुष्पवती पुष्पान् गंधांश्चैव न धारयेत् ॥ ४ ॥
ऋतुकाले तु नारीणां नान्यत्पुरुषदर्शनम् ।
संभाषं न च कुर्वीत यदीच्छेत् सन्ततिं शुभम् ॥ ५ ॥
भ्रातरं पितरं पुत्रं मातुलं श्वशुरं गुरुम् ।
न संभाषितमिच्छेत न चास्याप्युपवेशिनम् ॥ ६ ॥
यादृशेन हि भावेन संभाषन्तेः समाचरेत् ।
तादृशो जायते गर्भस्तस्माद्रक्षेद्रजस्वलाम् ॥ ७ ॥
रजसा विप्लुतां नारीं द्विजस्य ह्युपसेविनः ।
प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रहीयते ॥ ८ ॥
तां विवर्जयतस्तस्य रजसा समविप्लुताम् ।
प्रज्ञा तेजो बलं चक्षुरायुश्चैव वर्द्धते ॥ ९ ॥

निष्ठीविता गौरिव मन्दचारी तन्द्री प्रहृष्टा हृदयव्यथा च ।
तृप्तिस्तु बीजग्रहणे च योन्यां गर्भस्य सद्यो निर्गतस्य लिङ्गम् ॥१०॥

षष्ठे सम्भवते गर्भस्तद्धे षष्ठः प्रशस्यते ।
अब्दार्द्धे चक्षुनिष्पत्तिस्त्रिभिर्मासैस्तु जायते ॥११॥१२॥

[ १३ ]

ऋतुः स्वाभाविकः स्त्रीणां रात्रय षोडशः स्मृताः ।
चतुर्भिरितरैः सार्द्धमहोभिः सद्भिर्गर्हितैः ॥१॥
तासामाद्याश्चतस्रस्तु निन्दितकादशी तु या ।
त्रयोदशी तु शेषा स्युः प्रशस्ता दश रात्रयः ॥२॥

---

३. P न लंकृताम् । D न लंकृता । ४ P D कतुकाले । ५ P संभाष्यं ।
६ P D स्वनर । ७ P वाप्य ०। ८ D पत्रिष्ठा । ९ P निगतस्य ० । D निगतस्य ।

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् ॥३॥
पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियः ।
समेऽपुमान् पुंस्त्रियो वा क्षीणे चाल्पे विपर्ययः ॥४॥
चतुर्थ्यां जायते पुत्रो अल्पायुर्गुणवर्जिताः ।
विद्याचारपरिभ्रष्टो दरिद्र क्लेशभाजिनः ॥५॥
पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु पुत्रवान् ।
सप्तम्यामप्रजां कन्यामष्टम्यामीश्वरः सुतः ॥६॥
नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः ।
एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तमः ॥७॥
त्रयोदश्यां शठा पापा वर्णसंकरकारिणी ।
जायते सर्वदुष्टा स्त्री दुःखशोकभयप्रदा ॥८॥
धर्मज्ञश्च कृतज्ञश्च शासितात्मा तपोनिधिः ।
जायते च चतुर्दश्यां पितेव जगतः पतिः ॥९॥
राजपत्नी महाभागा राजवंशगता स्त्रियः ।
जायते पञ्चदश्यां तु बहुभोगा पतिव्रता ॥१०॥
विद्यालक्षणसम्पन्नः सत्यवादी जितेन्द्रियः ।
आधारः सर्वभूतानां षोडश्यां यः प्रजायते ॥११॥१३॥

[ १४ ]

कन्या तु त्रिकले ज्ञेया युग्मे भवति मानवः ।
तृतीया सन्ततिर्यस्य तद्रक्षेत्कुलदूषणम्[1] ॥१॥
सप्तमे म्रियते जन्तुस्तन्मुहूर्त्तं[2] विवर्जयेत्[2] ।
स्नातायां दशमीं तस्यां श्राद्धं तत्र विवर्जयेत् ॥२॥

1 P बाल्ये ।

1 P ०दूषक । D०दूषकं. but कं is cancelled and णं is given instead on the margin. 2 P D ०न्नर्मपि वर्जयेत् ।

अङ्गादङ्गात्[3] संभूतः स्वमङ्गमधितिष्ठति ।
पिता पुत्रत्वमापन्नो जायते म्रियतेऽपि वा ॥३॥
एवमेव त्रिभिर्भावैः सन्ततिश्च पुनः पुनः ।
अच्छिन्नो दैवतस्तं तु प्रजास्तस्मात् प्रजायते ॥४॥
पतिसंयोगकाले तु कन्या विघ्नं करोति या ।
अपुंस्त्वं लभते जन्म यत्र तत्रोपजायते ॥५॥
धर्म्मार्थकामयुक्तानि क्रूराणि च मृदूनि च ।
सिद्ध्यर्थं योगयोगेषु कुर्यात् कर्माणि नित्यशः ॥६॥
एवं नक्षत्रयोगेषु उक्तं[5] कर्म समारभेत् ।
धर्मार्थकर्मणामर्थे सर्वकर्मफलमश्नुते ॥७॥
शान्तिभिश्च यथान्यायमुपवासैर्व्रतादिभिः ।
येऽर्चयन्ति महात्मानं सर्वं प्रशमयन्ति तम् ॥८॥
उपवासैर्गवां दानैस्तर्पणैश्च मनीषीणाम् ।
ग्रहनक्षत्रजा दोषाः प्रशाम्यन्तीह देहिनाम् ॥ ९ ॥
नक्षत्राणि ग्रहाश्चैव देवताः पितरो द्विजाः ।
पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यपमानिताः ॥ १० ॥
आत्मज्योतिषमित्युक्तं स्वयमुक्तं स्वयंभुवा ।
तत्वतः पृच्छमाणस्य काश्यपस्य महात्मनः ॥११॥
य इदं पठते विप्रो विधिवच्च समाहितः ।
यथोक्तं लभते सर्वमाम्नायविधिदर्शनाद्
आम्नायविधिदर्शनादिति ॥१२॥१४॥

[2] एवं शौनकशाखायां ब्रह्मवेदस्याङ्गं ज्योतिषग्रन्थं
ब्रह्मकाश्यपानुवादं समाप्तम् ॥

---

3 P D ०दंगाद् । ४ P D दै०यतस्तं । In D च्य is cancelled and त्र is written above it. ५ D cancells it and gives त्रिषु । ६ D स्वकर्म० ।

# PUNJAB SANSKRIT SERIES.

READY FOR SALE.

**1. Barhaspatya Artha Sastra** or the Science of Politics according to the School of Brihaspati. Original text in Devanagari characters edited with an introduction, notes and English translation by Dr. F. W. Thomas, M. A., Librarian, India Office Library, London, together with an Historical Introductory Remarks and Indexes by Pt. Bhagavad Datta, B. A., Supdt. Research Department D. A. V. College, Lahore. "Its six chapters deal successively with the personal conduct required in a king; his duties and principles, his studies omens and rules for counsel; means for execution of Policy and courses of Policy." Printed on best ivory paper, cloth bound with gold letters. Price Rs. 2/8/-.

**2. Jaimini Grihya Sutra** or the Domestic Ceremonies according to the School of Jaimini. Original text in Devanagari Ch. edited with extracts from the comm. Subodhini list of Mantras, Notes, Introduction and for the first time translated into English by Dr. W. Caland, M. A , Professor of Sanskrit in the University of Utrecht. Printed on best ivory paper, cloth bound with gold letters. Price Rs. 6/-

**3. Aryavidyasudhakara** or a History of Sanskrit Literature ( in Sanskrit ) composed by Yajneshvara Cimana Bhatta, the same edited with various new notes by Mahamahopadhyaya Pt. Sivadatta D. Kudala Hd. Pt. Oriental College, Lahore. Printed on best antique paper, cloth bound with gold letters. Price Rs. 8/-.

**4. Kautiliyam Artha Sastram** Original text prepared with the help of Munich (German) Mss., and all other sources available. Edited with an extensive historical introduction of nearly 50 pages, and English notes by Dr. J. Jolly, M. A., Ph. D., and Dr. R. Schmidt, M. A., Ph. D. The ancient comm. Nayachandrika of Mahamahopadhyaya Madhva with various notes is also added. The most important variations of readings occuring in the other old Sanskrit Litera-

ture are also mentioned in the notes. "The recently discovered Artha Sastra of Kautilya *alias* Canakya or Visnu Gupta, is perhaps the most precious work in the whole range of Sans. Literature. It has shed an abundant light on the life of the people in Ancient India." Printed on best paper, cloth bound with gold letters. Vol. I containing text and introduction is now ready @ Rs. 5/-.

Vol II. Commentary and notes are in the Press and will be ready shortly.

**5. Nilamata Puranam** Hitherto unpublished text Edited with notes, introduction, indexes and 9 appendices etc., by Pro. R. L. Kanjilal, M.A., Vedantatirtha and Vidyaratan and J. D. Zadu. Esqr., Shastri, M. A., M. O. L. It is an historical work giving full accounts of the Ancient History of Kashmir. That this work is more ancient than the Kalhana's Rajatarangani is proved by the fact that Kalhana himself quotes many references from it. Dr. Buhler remarks about this valuable book:—"Its great value lies therein, that it is a real mine of information regarding the sacred places of Kashmir and their legends which are required in order to explain the Rajatarangini and that it shows how Kalhana used his sources." Thus it will be observed that from the historical point of view, this book is very interesting and is of great value to the scholars of Ancient History. Cloth bound with gold letters. Price Rs. 5/-.

**6. Atharvan Jyotish** Hitherto unpublished text edited with variants and a valuable introduction by Pt. Bhagavad Datta, B. A., Supdt. Research Deparment D. A. V. College, Lahore. Price Ans. -/8/-.

# त्वर्यताम्! त्वर्यताम्!! त्वर्यताम्!!!

वेद्यविद्याकुमुदिनीविकासनविशारदः।
विराजते ह्यविरतमार्यविद्यासुधाकरः॥ १॥
वेदा दिशा स्त्रपाथोधिमन्थनेनोद्धृतः सताम्।
विकासयतु चेतांसि त्वार्यविद्यासुधाकरः॥ २॥
विद्याविलासिनीलीलाविरहान्धीकृतात्मनाम्।
स्वान्तध्वान्तं हरत्येष आर्यविद्यासुधाकरः॥ ३॥

हंहो आर्यविद्याविलासिनीविलासविलोकनलालसाः! सहृदयाः!! महोदयाः!!! क्षणमितोऽपि दीयतां सदयमिदं युष्मदीयं नयनद्वयम्।

विलोक्यतां मुद्रणालयाकाशविमुद्रितो बहुप्रकाशो वेदादिवेद्यविद्याकुमुदिनीविकासविशारदोऽयमार्यविद्यासुधाकरः। (History of Sanskrit Literature).

ग्रन्थोऽयं समस्तार्यवर्यविद्याविवेकविनयनयशिल्पविज्ञानशौर्यौदार्यचातुर्यादिकथाप्रकाशको दाक्षिणात्येन द्विजन्ममूर्धन्येन चिमणाजीतनूजेन पण्डितप्रवरेण यज्ञेश्वरेण विरचितः।

ग्रन्थोऽयं ग्रन्थकारेण पञ्चभिः प्रकाशैः समापितः।

अत्र च प्रथमे प्रकाशे—आर्यजनानां मूलोत्पत्तिस्थानम्, तद्विषयका विप्रतिपत्तयः, त्रिविष्टपस्य विवेचनम्, ब्राह्मणादि जातिचतुष्टयविवेकस्य प्राचीनता, आर्यप्रजायाः प्रसवकालः, आर्याणां राजनीतिः, वैदिककाले वर्णलिपिप्रकाशः, तत्प्रचारः, वर्णलिपिप्रकाशविषयकं शर्मण्यदेशीयभट्टमोक्षमूलरमतं, तन्मतनिरसनं, धर्मलक्षणं, वेदस्वरूपं, ऋग्वेदस्य परिचयः, इत्येवमादयोऽवश्यं ज्ञातव्या विषयाः सुनिरूपिताः।

द्वितीये च प्रकाशे—अग्निहोत्रं, आग्रयणं, चातुर्मास्यं, सोमयागः, अश्वमेधयागः, इत्येवमादीनि श्रौतकर्माणि सविस्तरं निरूपितानि ।

तृतीये च प्रकाशे—गर्भाधानादीनि महायज्ञान्तानि पञ्चविंशतिस्मार्तकर्माणि, नैमित्तिक-वार्षिक-मासिक-दैनिक-स्वरूपाश्चत्वारः संस्काराः, ब्रह्मचर्याद्याश्रमचतुष्टयविचारः, इत्यवेमादयोऽवश्यं ज्ञातव्या विषया निरूपिताः ।

चतुर्थे प्रकाशे च—समयाचार-कुल-मिश्रकस्वरूपं तान्त्रिकमतम्, चतुःषष्टितन्त्रात्मकः कौलमार्गः, चार्वाक-माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकार्हताभिधनास्तिकमतानि, षड्दर्शनोक्तमतानि, रामानुजाचार्यमतम्, मध्वाचार्यमतं, वल्लभचार्यमतं, पाशुपतमतं, शैवमतं, प्रत्यभिज्ञामतं, रसेश्वरमतं, इत्येव मादयो विषयाः सुनिरूपिताः ।

पञ्चमे प्रकाशे च—वेदबाह्यधर्मप्रचारकारणम्, पुराणप्रतिपाद्यविविधधर्मविरोधपरिहारः, षड्दर्शनमतविरोधपरिहारः इत्येवमादयो विषयाःप्रदर्शिताः ।

ग्रन्थोऽयं सर्वाङ्गमनोहरतया विमुद्रितं विक्रयणाय सज्जीभूतमास्ते । अतस्त्वर्थतामेतद्ग्रहणाय । मूल्यं ८)

मिलने का ठिकाना:—

**मोतीलाल बनारसीदास**

**पञ्जाब संस्कृत पुस्तकालय**

सैदमिट्ठा बाजार लाहौर